वैकुण्ठवासिनः सर्व्वे तेन जानन्त्यहर्न्निशम् ॥
चन्द्रस्यापि ग्रहाणाञ्च गतिर्नास्तीति तत्र वै ।
चक्रं नैव भ्रमत्येव राशीनामिच्छया हरेः ॥
दिनञ्च तेजसा दीप्तं कृष्णस्य परमात्मनः ।
नक्तं तेजोविहीनञ्च हरौ च मन्दिरं गते ॥
एवं कालगतिस्तत्र विष्णुलोकेऽस्ति सन्ततम् ।
कालस्वरूपो भगवान् परमात्मा निराकृतिः ॥
चन्द्रसूर्य्यगतिर्नास्ति पातालेषु च सप्तसु ।
तद्वासिनश्च जानन्ति सङ्केतेन दिवानिशम् ॥
दिने च मूर्द्ध्नि नागानां मणिर्ज्वलति नित्यशः
सन्ध्यायां दीप्तिहीनश्च रात्रिश्च तमसावृता ॥
कालं तद्दीप्रमाणेन जानन्ति तन्निवासिनः ।
यथा भुवि तथा तत्र परिमाणं प्रकीर्त्तितम् ॥*॥
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ।
दिव्यैर्द्वादशसाहस्रैर्व्वत्सरैश्चापि सम्मितम् ॥
अष्टौ शतान्यप्यधिकं सहस्राणां चतुष्टयम् ।
दिव्यैर्व्वर्षैः कृतयुगं कालविद्भिर्निरूपितम् ॥
अष्टाविंशत्सहस्राण्यप्यधिकं परिमाणकम् ।
लक्षाणाञ्च सप्तदश नृमाणं परिकीर्त्तितम् ॥
अधिकं षट्शतान्येव सहस्राणां त्रयं तथा ।
दिव्यैर्व्वर्षैश्च त्रेतेति वत्स कालविदो विदुः ॥
षण्णवतिसहस्राणि लक्षैर्द्वादशभिः सह ।
नृणां वर्षैश्च त्रेतेति कालविद्भिः प्रकीर्त्तितः ॥
चतुष्टयं शतानाञ्चाप्यधिकं द्विसहस्रकम् ।
वर्षं दिव्यं द्वापरस्य कालज्ञैः परिकीर्त्तितम् ॥
चतुःषष्टिसहस्राणि लक्षैरष्टभिरेव च ।
नृणां वर्षैर्द्वापरस्य कालज्ञैः परिकीर्त्तितम् ॥
अधिकं द्विशतञ्चैव दिव्यं वर्षसहस्रकम् ।
एवं मितं कलियुगं वत्स प्राज्ञैः प्रकीर्त्तितम् ॥
द्वाविंशच्च सहस्रञ्च चतुर्लक्षं नृमाणकम् ।
वर्षञ्चेति कलियुगं चकार कालकोविदः ॥
लक्षैस्त्रिचत्वारिंशद्भिः सह विंशत्सहस्रकैः ।
नृमाणवर्षैः कालज्ञैर्व्यक्तमेव चतुर्युगम् ॥
इति ते कथितं वत्स कालसंख्यानिरूपणम् ।
यथाश्रुतं यथाज्ञानं गच्छ वत्स हरेः पुरम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे राधोद्धवसं-
वादे कालनिरूपणम् ८६ अध्यायः ॥*॥ अपि च ।

मार्कण्डेय उवाच ।

“निमेषो नाम कालाङ्गो नेत्रोन्मेषविलक्षितः ।
तैरष्टादशभिः काष्ठा काष्ठानां त्रिंशता कला ॥
कलाभिस्तावतीभिस्तु क्षणाख्यः परिकीर्त्तितः ।
क्षणैर्द्वादशभिः प्रोक्तो मुहूर्त्तस्तैस्तु त्रिंशता ॥
मानुषः स्यादहोरात्रः पक्षस्ते दश पञ्च च ।
पक्षाभ्यां मानुषो मासः पितॄणां तदहर्न्निशम् ॥
मासैर्द्वादशभिर्व्वर्षो देवानां तदहर्निशम् ।
कृष्णपक्षः पितॄणान्तु कर्म्मार्थं दिवसो मतः ॥
स्वप्नार्थं शुक्लपक्षस्तु रजनी परिकीर्त्तिता ।
देवानान्तु दिनं प्रोक्तं षण्मासा उत्तरायणम् ॥
रात्रिः स्वप्नाय देवानां षण्मासा दक्षिणायनम्
द्वाभ्यां द्वाभ्यान्तु मासाभ्यामर्कजाभ्यामृतुः
स्मृतः ॥
ऋतुभिश्चायनं प्रोक्तं त्रिभिस्तन्मानुषं मतम् ।
ऋतुभिर्व्वत्सरः षड्भिस्तांश्च शृणु पृथक्
पृथक् ॥ * ॥
चैत्रादियुगलैः संज्ञा तैस्तैः षड्भिर्द्विजोत्तमाः ।
वसन्तश्चैत्रवैशाखौ ग्रीष्मो ज्यैष्ठः शुचिस्तथा ॥
प्रावृट् नभोनभस्यौ तु शरत् स्यादिशकार्त्तिकौ ।
सहःपौषौ च हेमन्तः शिशिरो माघफाल्गुनौ ॥
षड़िमे ऋतवः प्रोक्ताः यज्ञादौ विहिताः पृथक् ।
नृणां मानेन दशभिर्लक्षैः सप्तभिरुत्तरैः ॥
साष्टाविंशतिसाहस्रैर्म्मानं कृतयुगस्य च ।
सन्ध्या चतुःशतानीह वर्षाणामन्तरालतः ॥
सन्ध्यांशस्तावता प्रोक्तस्तदन्तर्गत ईरितः ।
त्रेता द्वादशभिर्लक्षैर्म्मानुषैर्व्वत्सरैर्भवेत् ॥
षण्णवत्या सहस्रैश्च सन्ध्या च स्यात् शतत्रयम् ।
शतत्रयन्तु सन्ध्यांशस्तदन्तः परिकीर्त्तितः ॥
चतुःषष्टिसहस्राणि लक्षाण्यष्टौ प्रमाणतः ।
भवेद्युगं द्वापराख्यं तेषु सन्ध्या शतद्वयम् ॥
शतद्वयन्तु सन्ध्यांशस्तदन्तर्गत इष्यते ।
द्वाविंशत्तु सहस्राणि चतुर्लक्षाणि वै कलेः ।
संवत्सरैर्भवेन्मानं सन्ध्यैकं प्रोच्यते शतम् ॥
वत्सराणामेकशतं सन्ध्यांशश्च तदन्तरे ।
एवं कृतश्च त्रेता च द्वापरश्च तथा कलिः ॥
मानुषेण प्रमाणेन भवेद्युगचतुष्टयम् ।
त्रिचत्वारिंशता लक्षैर्मानं चतुर्युगं भवेत् ॥
सहस्रैरपि विंशत्या सन्ध्यासन्ध्यांशसंयुतम् ।
दैवं दिनं वत्सरेण मानुषेण स्वरात्रकम् ॥
एवं क्रमं गणित्वा तु मानुषीयैश्चतुर्युगम् ।
दैवं द्वादशसाहस्रं वत्सराणां प्रकीर्त्तितम् ॥
दैवैर्द्वादशसाहस्रैर्व्वत्सरैर्द्दैविकं युगम् ।
तच्चतुर्युगं नृणां सन्ध्यासन्ध्यांशसंयुतम् ॥
देवानान्तु कृतं त्रेता द्वापरादिव्यवस्थया ।
न युगव्यवहारोऽस्ति न च धर्म्मादिभिन्नता ॥
किन्तु चातुर्युगं नारं भवेद्दैवयुगं सदा ।
दैवैरेव च सप्तत्या युगैर्म्मन्वन्तरं भवेत् ॥
दैवे युगसहस्रे द्वे ब्रह्मणः स्यादहर्न्निशम् ।
चतुर्युगसहस्रे द्वे नृणां मानेन तद्भवेत् ॥
एकस्मिन् ब्राह्मदिवसे मनवः स्युश्चतुर्द्दश ।
एवं ब्राह्मेण मानेन दिवसैस्तु त्रिभिः शतैः ॥
सषष्टिभिर्व्वत्सरः स्याद्ब्राह्मो वर्षो नृणां यथा
ब्राह्मैः पञ्चशता वर्षैः परार्द्धः परिकीर्त्तितः ॥
तदीश्वरस्य दिवसं तावती रात्रिरिष्यते ।
शतेन ब्रह्मणो वर्षैः कालः स्यात् द्विपरार्द्धकः ॥
परार्द्धद्वितयेऽतीते ब्रह्मणः प्रलयो भवेत् ।
प्रलीने ब्रह्मणि परे जगतां प्राकृतो लयः ॥
समस्तजगदाधारमव्ययं यत् परात्परम् ।
तस्य ब्रह्मस्वरूपस्य दिवारात्रञ्च तद्भवेत् ।
तत्परं नाम तस्यार्द्धं परार्द्धमभिधीयते ॥”
इति श्रीकालिकापुराणे २४ अध्यायः ॥*॥
किञ्च ।
“अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्त्तितः ।
द्वौ निमिषौ त्रुटिर्नाम द्वे त्रुटौ तु लवः स्मृतः ॥
द्विलवः क्षण इत्युक्तः काष्ठा प्रोक्ता दश
क्षणाः ।
दश काष्ठाः कला नाम तत्संख्या स्याच्च
घाटिका ॥
घटिके द्वे मुहूर्त्तः स्यात्त्रिंशत्या दिवानिशम् ।
चतुर्व्विंशतिवेलाभिरहोरात्रं प्रचक्षते ॥
सूर्य्योदयादिविज्ञेयो मुहूर्त्तानां क्रमः सदा ।
पश्चिमादर्द्धरात्रादिहोराणां विद्यते क्रमः ॥”
इति वह्निपुराणे गणभेदनामाध्यायः ॥*॥
अपरं नृसिंहपुराणे २ अध्याये कौर्म्मे ६ अध्याये
च द्रष्टव्यम् ॥

समयकारः, पुं, (समयस्य कारः करणम् ।) सङ्केतः
यथा,—
“प्रज्ञाप्तिः परिभाषा स्यात् सङ्केतसमयकारयोः ।”
इति त्रिकाण्डशेषः ॥

समया, व्य, (समयनमिति । सम् + इण गतौ +
“आः समिण्निकषिभ्याम् ।” उणा० ४।१७४।
इति आप्रत्ययः ।) निकटः । अस्य पर्य्यायः ।
निकषा २ हिरुक् ३ । इत्यमरः ॥ (यथा,
शिशुपालवधे । ६ । ७२ ।
“कुटजानि वीक्ष्य शिखिभिः शिखरीन्द्रं
समयावनी घनमदभ्रमराणि ।
गगनञ्च गीतनिनदस्य गिरोच्चैः
समया वनीघनभ्रमराणि ॥”)
मध्यः । इति चामरः । ३ । ३ । २६१ ॥
“समया निकटे मध्ये मध्ये च निकषान्तिके ।
हिरुङ्मध्ये विनार्थे च———॥”
इति रुद्रः ॥
हिरुगुक्तञ्च सामीप्ये । इत्यमरमाला ॥ काल-
विज्ञापनम् । इति शब्दरत्नावली ॥

समरः, पुं, क्ली, (सम्यक् अरणं प्रापणमिति
सं + ऋ गतौ + अप् । यद्वा, सम्यक् ऋच्छन्त्य-
त्रेति । “मन्दरकन्दरशीकरेति ।” बाहुलकात्
अरप्रत्ययेन साधुः । इत्युज्ज्वलः । ३ । १३१ ।)
युद्धम् । इत्यमरः ॥ (यथा, रघुः । १२ । ८२ ।
“इतराण्यपि रक्षांसि पेतुर्व्वानरकोटिषु ।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥”)

समरभः, पुं, (समरवत् भातीति । भा + कः ।)
रतिबन्धविशेषः । तस्य लक्षणं यथा,—
“स्वजङ्घाद्वयसंयुक्तं कृत्वा योषित्पदद्वयम् ।
स्तनौ धृत्वा रमेत् कामी बन्धः समरभः स्मृतः ॥”
इति रतिमञ्जरी ॥

समरूप्यः, त्रि, (समादागत इति । सम + “हेतु-
मनुष्येभ्योऽन्यतरस्यां रूप्यः ।” ४ । ३ । ८१ ।
इति रूप्यः ।) समस्य साधोर्भूतपूर्व्वो गवादिः ।
समशब्दात् रूप्यप्रत्ययेन निष्पन्नः ॥

समर्थः, त्रि, (समर्थयते इति । सं + अर्थ + पचा-
द्यच् ।) शक्तः । (यथा, तिथितत्त्वे ।
“ये समर्था जगत्यस्मिन् सृष्टिस्थित्यन्तकारिणः
तेऽपि कालेन लीयन्ते कालो हि बलवत्तरः ॥”)
सम्बन्धार्थः । हितः । इत्यमरः ॥ (यथा, महा-
भारते । १३ । ५ । २६ ।
“नार्हसि मां सहसाच्च द्रुमं त्याजयितुं चिरात् ।
समर्थमुपजीव्येमं त्यजेयं कथमद्य वै ॥”)